# सालङ्कायनोपदेशः

**दशमशताब्दस्य पूर्वार्द्धे त्रिविक्रमभट्टविरचितं नलचम्पूकाव्यं चम्पूकाव्यक्षेत्रे अतीव प्रसिद्धमस्ति। 'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते' इति चम्पूकाव्यस्य लक्षणम्। सप्तोच्छ्वासेषु विभक्तेऽस्मिन् काव्ये प्रामुख्येन दमयन्तीनलयोः प्रणयकथा वर्णिता अस्ति। चतुर्थोच्छ्वासे मन्त्रिणः सालङ्कायनस्य वीरसेनसूनुं नलं प्रति प्रदत्ताः उपदेशाः छात्राणां शिष्टाचारावगमनाय अत्र प्रदीयन्ते।**

एकदा तु निरुद्धान्धतमसे बन्धूककुसुमारुणे वियति तरतीव तरुणतरे तरणिमण्डले, कृतप्राभातिककर्मणः सभाङ्गणमण्डपमध्यवर्तिनो दत्तसेवावसरस्य राज्ञः प्रविष्टे मन्त्रिणि सालङ्कायने श्रुतिशीलेन सममन्यैश्च क्रीडासहायैरनुचरैरनुगम्यमानो नलः सेवासुखमनुभवितुमागतवान्।

आगत्य च क्षितितलमिलन्मौलिमण्डलः प्रणम्य पितुः पादारविन्दद्वयमदूरदत्तमासनं भेजे।

उपविष्टे च तस्मिन् अनभिवादनात् उत्पन्नमन्युः अग्रणीः मन्त्रिमण्डलस्य भ्रूभङ्गभीषणया दृशा अभिमुखमस्य सालङ्कायनः प्रणयपरुषाक्षरमभाषत।

कुमार, राजहंसोऽपि 'अहं सरूपः' इति मास्म मोहवान्भूः।

तत्तात! सुविषमेघवर्त्तिनि विद्युद्विलास इवास्थिरे स्थितस्तारुण्ये मा स्म विस्मर स्मयेन विनयम्। अविनीतोऽग्निरिव दहति। अजातनयश्छाग इव नाभिनन्द्यते जनेन।

आवर्जय गुणान्। निर्गुणे धनुषीव सुवंश्येऽपि कस्याग्रहो भवति। अभ्यस्य कलाः। निष्कलो वीणा ध्वनिरिव प्रशस्यते न पुरुषः। त्यज जाड्यम्। जाड्ययोगेन हिमानी दूष्यतां याति। मा स्म मुखरो भूः। मुखरतां न शंसन्ति साधवः। भज माधुर्यम्। धवलबलीवर्दपङ्क्तिरिव समाधुर्या वाणी मनो हरति। वर्जय वैपरीत्यम्। विपरीतं शवमिव को न परिहरति। मा च वृद्धिं प्राप्य गुणेषु द्वेषं कार्षीः। व्याकरणे हि वृद्धिर्गुणं बाधते, न सत्पुरुषेषु। वत्स, मा चैवं चेतसि कृथाश्छान्दसोऽयम्।

**किं बहुना -** *तथा भव यथा तात त्रैलोक्योदरदर्पणे।*
*विशेषैर्भूषितस्तैस्तैर्नित्यमात्मानमीक्षसे ॥*

**अपि च -** *किं तेन जातु जातेन मातुर्यौवनहारिणा।*
*आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा ॥*

## शब्दार्थः

निरुद्धान्धतमसे - निरुद्धम् अवरुद्धम् अन्धतमः गाढान्धकारम् येन तादृशे, अवरुद्धगाढान्धकारे। बन्धूककुसुमारुणे - बन्धूकपुष्पसदृशरक्ते। वियति - आकाशे। तरुणतरे - अतितरुणे। तरणिमण्डले - सूर्यमण्डले। क्षितितलमिलन्मौलिमण्डलः - क्षितितलं भूतलं मिलत् स्पृशत् मौलिमण्डलं भालमण्डलं यस्य सः नलः। अदूरदत्तम् - निकटम्। भेजे - अभजत्। अनभिवादनात्- नमस्कृत्य करणात्, अभिवादनस्याकरणात्। प्रणयपरुषाक्षरम् - प्रणयेन प्रेम्णा परुषाक्षरं यस्मिन् तद् यथा स्यात्तथा। राजहंसः - राजमुख्यः। सरूपः - रूपवान्। सुविषमेघवर्तिनि - सुविषे-सुष्ठुजलयुते, मेघे-घने, वर्तिनि-विद्यमाने। अस्थिरे - चञ्चले। विद्युद्विलासे - तडिद्विलासे। इव - समम्। तारुण्ये - यौवने। स्मयेन - अहङ्कारेण। विनयम् - नम्रत्वम्। मा स्म विस्मर - मा विस्मरणं कुरु। अविनीतः - अविनयी। दहति - आत्मनः परस्य च दाहमुत्पादयति। अजातनयः - अजातः अनुत्पन्नः नयः नीतिः यस्मिन् सः नीतिरहितः। छागः इव - अजा पुत्र इव। आवर्जय - अर्जय। निर्गुणे - गुणहीने प्रत्यञ्चाहीने वा। धनुषि इव - कोदण्ड इव। सुवंश्ये अपि - सुकुलात्, सुवंशाख्यपादपात् जाते च जातेऽपि। आग्रहः - आदरः। निष्कलः - कलाभिः रहितः कलयितुमशक्यो वा। जाड्योगेन - मूर्खत्वेन, अतिशैत्येन वा। हिमानी - हि-निश्चयेन मानी - स्तब्धःपुरुषः, अथवा हिमसंहतिः। दूष्यतां याति - दूषितो भवति। मुखरः- वाचालः। न शंसन्ति - न स्तुवन्ति। समाधुर्या - माधुर्येण सह, सुमधुरा, अथवा समा अविषमा धुर्या धूर्वाहिनी। धवलबलीवर्दपंक्तिरिव - उज्ज्वलवृषश्रेणीसमम्। वैपरीत्यम् - विपरीतस्य भावम्। विपरीतम् - विरुद्धाचारिणम्, अथवा विभिः पक्षिभिः परीतं व्याप्तम्। वृद्धिं प्राप्य - समृद्धिं लब्ध्वा। छान्दसः - वैदिकत्वम्, स्वच्छन्दताम्। मा कृथाः - मा कुरुष्व। त्रैलोक्योदरदर्पणे - त्रैलोक्यस्य उदररूपदर्पणे। विशेषैः - दानादिगुणैः। जातु - कदाचित्।मातुः - जनन्याः।

## अभ्यासः

1. **एकपदेन उत्तरत -**

(क) कान् आवर्जय ?

(ख) नलः किम् अनुभवितुम् आगतवान् ?

(ग) साधवः कां शंसन्ति ?

(घ) वृद्धिं प्राप्य केषु द्वेषं मा कार्षीः ?

(ङ) सत्पुरुषेषु किं न बाधते ?

2. **एकवाक्येन उत्तरत -**

(क) सालङ्कायनः किम् अक्षरम् अभाषत् ?

(ख) कः अग्निरिव दहति ?

(ग) वीणाध्वनिः इव कः न प्रशस्यते ?

(घ) हिमानी केन योगेन दूष्यतां याति ?

(ङ) समाधुर्या वाणी किं हरति ?

3. **रिक्तस्थानानि पूरयत -**

(क) अभ्यस्य ................................ ।

(ख) ............................... धनुषीव सुवंश्येऽपि कस्याग्रहो भवति।

(ग) या स्म ............................... भूः।

(घ) .................................. इव समाधुर्या वाणी मनो हरति।

(ङ) ............................ वर्जय।

**4. युग्ममेलनं कुरुत -**

| 'अ' | 'आ' |
|---|---|
| (क) मन्त्री | सूर्यमण्डले |
| (ख) गुणेषु द्वेषम् | नलः |
| (ग) राज्ञः | सालङ्कायनः |
| (घ) अभ्यस्य | कलाः |
| (ङ) तरणिमण्डले | मा कार्षीः |

**5. अधोलिखितपदानां विभक्तिं वचनञ्च लिखत -**

(क) राज्ञः

(ख) शीलेन

(ग) पितुः

(घ) अग्रणीः

(ङ) गुणेषु

**6. अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनञ्च लिखत -**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) अगच्छन् | | | | |
| (ख) भेजे | | | | |
| (ग) अभाषत | | | | |
| (घ) दहति | | | | |
| (ङ) हरिष्यथ | | | | |

**7. प्रकृतिप्रत्ययौ पृथक् कुरुत -**

(क) गतवान्

(ख) प्रणम्य

(ग) आरोहति

**8. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत -**

(क) अविनीतोऽग्नि

(ख) चैवम्

(ग) त्रैलोक्योदर:

(घ) अग्निरिव

(ङ) अप्येकम्

**9. अधोलिखितपदानां समानार्थिपदं लिखत -**

(क) इव

(ख) अस्थिरे

(ग) स्मयेन

(घ) निष्कल:

(ङ) कृथा:

**10. अव्ययान् आधृत्य वाक्यनिर्माणं कुरुत -**

(क) इति

(ख) तु

(ग) मा

(घ) अपि

(ङ) यथा

**11. नलचम्पू-प्रणेता क: -**

(क) त्रिविक्रमभट्ट:

(ख) कालिदास:

(ग) भोज:

(घ) बाणभट्ट:

**योग्यताविस्तार: –**

- पाठे समागतान् उपदेशान् जीवने आचरत्।
- अन्यानि उपदेशपुस्तकानि अन्वेषयत पठत च।